# Tritattvalakini Stavanam

# त्रितत्त्वलाकिनीस्तवनम्

## Document Information

Text title : Tritattvalakini Stavanam

File name : tritattvalAkinIstavanam.itx

Category : devii, ShaTchakrashakti, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 1 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 1 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator

muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# त्रितत्त्वलाकिनीस्तवनम्

शिवां शक्यामाद्यां दशदलगतां रुद्रमहिषीं
विशालाक्षीं सूक्ष्मां शशियुतजटाजूटमुकुटाम् ।
महाविद्युत्कोटिप्रियजडितपीठे त्रिनयनां
महालाकिन्याख्यां दशदल कलां भावयति कः ॥ ४४-२५॥

मृणालान्तर्ध्वान्तः प्रकटतटसंहारसुभगां
कुलक्षेत्रोल्लासां चरमपददां दीपकलिकाम् ।
सदानन्दाकारां गतिगुणहरां चारुकिरणां
प्रभावर्णश्यामां रुचिरवदनां भावयति कः ॥ ४४-२६॥

प्रतीक्षानन्दाब्धिं प्रकटचरणाम्भोजयुगलां
वियद्वर्णां कान्तां सुरवरसुपूजाविधिरताम् ।
महासूक्ष्मद्वारप्रचलनकरीं भेदनकरीं
दिवायोगाह्लादप्रियजनशिवां भावयति कः ॥ ४४-२७॥

अयोध्यापीठस्थामरुणकमनीं प्रेमगलितां
महारौद्रीं भीमां शतशतरविप्रेमनिकराम् ।
महादुःखार्तानां नयनशुभगां भावविरहां
सतीं सीतामिन्द्रोत्सवनवघटां भावयति कः ॥ ४४-२८॥

सुधाब्धेराह्लादप्रकरणसुरां सौरभकरां
क्रियारूपां योग्यां भुवमणिपूरप्रकृतिगाम् ।
गुरोः स्थानोद्योगां समनदहनां शीतलवरां
त्रितत्त्वां तत्त्वज्ञां स(श)मरहरशक्तिं भजति कः ॥ ४४-२९॥

विकाराकाराङ्गीं तरुणरविकोटिश्रियमिमां
कुलाधारां सारां परमरसधारां जयवराम् ।
कृपाच्छन्नाकामां परमरसभाण्डेषु शुभदां
भजेदिन्द्रां रुद्रां शशिमुखकराह्लादनिकराम् ॥ ४४-३०॥

रसाब्धौ विश्रान्तिं कुपितजनशान्तिं सकरुणां
त्रिलोकज्ञानस्थां मदननिलयां योगनिकराम् ।
मणिद्वीपच्छायां दशदलकलां केवलभवां
भवानीं रुद्राणीं वरदमणिपूरे भजति कः ॥ ४४-३१॥

कृपाब्धौ किं किं किमनुगतसुतां मौलिनमितां
शिवाङ्कां मूलस्थां सकलमणिपूरस्थिरभवाम् ।
हिरण्याक्षीं तक्षां क्षयकरणरश्मिच्छविशतां
विनोदीं पञ्चास्यप्रियगुणधरां भावयति कः ॥ ४४-३२॥

महापद्माख्यां सकलधनदानाकुलचलां
चलानन्दोद्रेकप्रचयरससिन्धूद्भवहृदि ।
हृदानन्दो ध्यायेत् सकलगुणदात्रीं सुखमयीं
कलां सूक्ष्मात्यन्तां तिमिरदहनां कोटिधनदाम् ॥ ४४-३३॥

दशकं यः पठेन्नित्यं श्रीविद्यां सुखदायिनीम् ।
ध्यात्वा हृदयपद्माधो निर्मलात्मा सदा पठेत् ॥ ४४-३४॥

मणिपूरस्थितं देवं रुद्रं पश्यति योगिराट् ।
रुद्राणीसहितं शम्भुं दृष्ट्वा मुक्तो भवेत् क्षणात् ॥ ४४-३५॥

जीवन्मुक्तः स एवात्मा योगिनीवल्लभो भवेत् ।
योगात्मा परमात्मा च स हि साक्षादनीश्वरः ॥ ४४-३६॥

स भित्वा मणि पूराब्धिं निर्मलं ज्योतिरुज्ज्वलम् ।
शम्भोरीश्वरयोगज्ञक्रियानाथस्य श्रीपतेः ॥ ४४-३७॥

निकटे याति देव्याश्च स्थाने योगी न संशयः ॥ ४४-३८॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे
षट्चक्रप्रकाशे मणिपूरभेदने भैरवीभैरवसंवादे
त्रितत्त्वलाकिनीशक्तिस्तवनं नाम चतुश्चत्त्वारिंशत्तमः पटलः ॥ ४४॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Tritattvalakini Stavanam*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*